[1]द्वितीये सूत्रार्थे – मोदकाः प्रकृताः [2]अस्मिन् यज्ञे [3]मौदकिको यज्ञः, मोदकमयः । शाष्कुलिकः, शाष्कुलीमयः ॥

## अनन्तावसथेतिहभेषजाञ्ञ्यः । (२३/२००१)

अनन्तादिभ्यः[4] स्वार्थे ञ्यः प्रत्ययो भवति । [5]अनन्त एव आनन्त्यम् । [6]आवसथ एव [7]आवसथ्यम् । इति ह ऐतिह्यम् । निपातसमुदायोऽयमुपदेशपारम्पर्ये वर्तते । भेषजमेव भैषज्यम् । महाविभाषया विकल्पते प्रत्ययः ॥

## देवतान्तात् तादर्थ्ये यत् । (२४/२००२)

देवताशब्दान्तात् [8]प्रातिपदिकात् चतुर्थीसमर्थात् तादर्थ्ये यत्प्रत्ययो भवति । तदर्थ एव तादर्थ्यम् । चातुर्वर्ण्यादित्वात् ष्यञ् (वा. ५३९) । तद् इति प्रकृत्यर्थो निर्दिश्यते । अग्निदेवतायै इदम् अग्निदेवत्यम् । [9]पितृदेवत्यम् । [10]वायुदेवत्यम् ॥

## पादार्घाभ्यां च । (२५/२००३)

तादर्थ्ये इत्येव । पादार्घशब्दाभ्यां चतुर्थीसमर्थाभ्यां तादर्थ्ये अभिधेये यत्प्रत्ययो भवति । पादार्थमुदकं पाद्यम् । अर्घ्यम् । अनुक्तसमुच्चयार्थश्चकारः । [11]यथादर्शनमन्यत्रापि प्रत्ययो भवति । 'एष वै छन्दस्यः प्रजापतिः' (तै. सं. १.६.११.४) । [12]वसु, [13]अपस्, [14]ओक, कवि, क्षेम, [15]उदक, वर्चस्, निष्केवल, उक्थ, [16]जन, पूर्व, नव, सूर, मर्त, यविष्ठ इत्येतेभ्यः छन्दसि [17]स्वार्थे यत्प्रत्ययो भवति । 'अग्निरीशे वसव्यस्य' (ऋ.४.५५.८) । [18]'अपस्यो वसानाः' (मै. सं. २.६.८) । [19]द्वितीयाबहुवचनस्यालुक् । [20]अपो वसानाः इत्यर्थः । 'स्व ओक्ये' (ऋ. १.९१.१३) । 'कव्योऽसि कव्यवाहनः' (मै. सं. १.३.१२) । 'क्षेम्यमध्यवस्यति' (तै. सं. ५.२.१.७) । वायुर्वर्चस्यः । 'निष्केवल्यं शंसन्ति' (का. सं. २८.१०) । उक्थ्यं शंसति । जन्यं ताभिः । 'पूर्व्यां विदुः' (अ. १९.३४.६) । 'स्तोमं जनयामि नव्यम्' (ऋ. १.१०९.२) । 'सूर्यः' (ऋ. १.२३.१७) । 'मर्त्यः' (ऋ. १.१९.२) । 'यविष्ठ्यः' (ऋ. १.३६.६) ।

[६२२] आमुष्यायणामुष्यपुत्रिकेत्युपसङ्ख्यानम् ।

---

1. द्वितीयसूत्रार्थे क. 2. यस्मिन् क. 3. स इत्यधिकम् क. 4. शब्देभ्यः इत्यधिकम् फ. ह. 5. अनन्तभावः एव ह, अनन्तमेव ह. 6. आवसथभावः ह. 7. आवसथ्यः क. 8. प्रातिपदिकात् नास्ति ह. 9. नास्ति क. 10. नास्ति क. ह. 11. तेन इत्यधिकम् क. ह. 12. असु क. 13. अयस् मुद्रितः पाठः 14. सुक क. 15. नास्ति ह. 16. जनि ह. 17. विषये इत्यधिकम् ह. 18. अयस्यो मुद्रितः पाठः 19. अपशब्दात् इत्यधिकम् क. 20. अयो मुद्रितः पाठः